# .. devIpa ncharatna ( devI prAtaHsmaraNa ) ..

## ॥ देवीपञ्चरत्न ( देवी प्रातःस्मरण ) ॥

॥ श्रीः ॥

॥ देवी पञ्चरत्नम् ॥

प्रातः स्मरामि ललिता वदनारविन्दं
बिम्बाधरं पृथल- मौक्तिक शोभिनासम् ।
आकर्ण- दीर्घ- नयनं मणिकुण्डलाढ्यं
मन्दस्मितं मृगमदोज्ज्वल- फाल- देशम् ॥ १॥
प्रातर्भजामि ललिता- भुज- कल्पवल्लीं
रत्नांगुळीय- लसदंगुळि- पल्लवाढ्याम् ।
माणिक्य- हेम- वलयांगद- शोभमानां
पुंड्रेक्षु- चाप- कुसुमेषु- सृणीं दधानाम् ॥ २॥
प्रातर्नमामि ललिता- चरणारविन्दं
भक्तेष्ट- दान- निरतं भवसिन्धु- पोतम् ।
पद्मासनादि- सुरनायक- पूजनीयं
पद्मांकुश- ध्वज- सुदर्शन- लाञ्चनाढ्यम् ॥ ३॥
प्रातस्तुवे परशिवां ललितां भवानीं
त्रय्यन्त- वेद्य- विभवां करुणानवद्याम् ।
विश्वस्य सृष्टि- विलय- स्थिति- हेतु- भूतां
विश्वेश्वरीं निगमवाङ्मनसातिदूराम् ॥ ४॥
प्रातर्वदामि ललिते तव पुण्यनाम
कामेश्वरीति कमलेति महेश्वरीति ।
श्री शांभवीति जगताम् जननी परेति
वाग्देवतेति वचसा त्रिपुरेश्वरीति ॥ ५॥
यः श्लोकपञ्चकमिदं ललिताम्बिकायाः
सौभाग्यदं सुललितं पठति प्रभाते ।
तस्मै ददाति ललिता झडिति प्रसन्ना
विद्यां श्रियं विमलसौख्यमनन्तकीर्तिम् ॥ ६॥
॥ इति श्रीमच्छङ्करभगवतः कृतौ देवीपञ्चरत्नं संपूर्णम् ॥

Encoded and proofread by Varadarajan T.S tsv at cs.umanitoba.ca

Please send corrections to sanskrit@cheerful.com
Last updated November 19, 2010